# Model Paper -III- 2024-25

## Class - X

**Time : 3:15 Hours** **Subject:- Sanskrit** **M.M. : 80**

- *GENERAL INSTRUCTIONS TO THE EXAMINEES:*
  *परीक्षार्थियों के लिए सामान्य निर्देश:*
- *Candidate must write first his/her Roll No. on the question paper compulsory.*
  *परीक्षार्थी सर्वप्रथम अपने प्रश्न पत्र पर नामांक अनिवार्यत: लिखें।*
- *All the questions are compulsory.*
  *सभी प्रश्न हल करने अनिवार्य हैं।*
- *Write the answer to each question in the given answer-book only.*
  *प्रत्येक प्रश्न का उत्तर दी गई उत्तर-पुस्तिका में ही लिखें।*
- *For questions having more than one part, the answers to those parts are to be written together in continuity.*
  *जिन प्रश्नों मे आन्तरिक खण्ड है, उन सभी के उत्तर एक साथ ही लिखें।*
- *Write down the serial number of the question before attempting it.*
  *प्रश्न का उत्तर लिखने से पूर्व प्रश्न का क्रमांक अवश्य लिखें।*

## खण्ड - ''अ''

**01. वस्तुनिष्ठप्रश्ना :-** **[17×1=17]**

**(i)** लवकुशयो: समुदाचार: कीदृश: आसीत्? 1

(अ) स्वाभाविक: (ब) उदात्तरम्य: (स) निन्दनीय: (द) अशोभनीय:

**(ii)** भयाकुलं व्याघ्रं दृष्ट्वा क: हसति? 1

(अ) बुद्धिमती (ब) राजसिंह: (स) मृग: (द) श्रृगाल:

**(iii)** राजा तु कीदृश: भवति? 1

(अ) भक्षक: (ब) वीर: (स) रक्षक: (द) चतुर:

**(iv)** कीदृशे प्रदेशे पदयात्रा न शुभावहा? 1

(अ) रम्ये (ब) जनसंकुले (स) विजने (द) दुर्गमे

**(v)** सम्पत्तौ च विपत्तौ च केषाम् एकरूपता भवति? 1

(अ) महताम् (ब) बलीनाम् (स) बालकानाम् (द) धनिकानाम्

**(vi)** सुरभि: कासां माता आसीत्? 1

(अ) अश्वानाम् (ब) दैत्यानाम् (स) धेनूनाम् (द) देवानाम्

**(vii)** काकः कस्य सन्ततिं पालयति? 1

(अ) पिकस्य (ब) सर्पस्य (स) कपोतस्य (द) शुकस्य

**(viii)** योजकः + तत्र इत्यस्य सन्धिपदमस्ति– 1

(अ) योजकोतत्र (ब) योजकर्तत्र (स) योजकतत्र (द) योजकस्तत्र

**(ix)** चर्त्व सन्धेः उदाहरणमस्ति– 1

(अ) जगदीशः (ब) तट्टीका (स) हरिं वन्दे (द) उत्सर्गम्

**(x)** विसर्ग लोप सन्धेः उदाहरणमस्ति– 1

(अ) वयोऽनुरोधात् (ब) वामनकल्प एव (स) मनस्तु (द) तोयैरल्पैः

**(xi)** "पुनरपि" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति– 1

(अ) पुन + रपि (ब) पुनर् + अपि (स) पुनः + अपि (द) पुनः + रपि

**(xii)** "कृते" इति पदयोगे का विभक्तिः भवति? 1

(अ) तृतीया (ब) पञ्चमी (स) षष्ठी (द) सप्तमी

**(xiii)** "धिक्" शब्दयोगे का विभक्तिः भवति? 1

(अ) चतुर्थी (ब) षष्ठी (स) तृतीया (द) द्वितीया

**(xiv)** "निस्सन्देहम्" इत्यत्र पदे कः उपसर्गः? 1

(अ) निर् (ब) निस् (स) नि (द) निस्स

**(xv)** "अवस्था" इत्यत्र उपसर्गं शब्दञ्च पृथक् कृत्वा लिखत– 1

(अ) अव + स्था (ब) अ + वस्था (स) अवः + था (द) अवः + स्था

**(xvi)** "प्रच्छ" धातो लृट् लकारस्य रूपमस्ति– 1

(अ) प्रक्ष्यति (ब) पृच्छति (स) पृच्छेत् (द) अपृच्छत्

**(xvii)** "मह्यम् पुस्तकं <u>देहि</u>।" रेखाङ्कितपदे को धातुः? 1

(अ) दे (ब) दद् (स) दा (द) देह्

**02. निर्देशानुसारं रिक्तस्थानानि पूरयत–** **[5×1=5]**

(i) अधुना ................................हि सृष्टिरेषा। (रम् + अनीयर्) 1

(ii) पर्यावरणस्य ......................................सर्वे जानन्ति। (महत् + त्व) 1

(iii) तस्य भगिन्याः नाम ............................अस्ति। (दीपक + टाप्) 1

(iv) गृहस्थः ............................आश्रयं प्रायच्छत्। (अतिथिशब्दे चतुर्थी) 1

(v) सः .................................निष्क्रम्य बहिरगच्छत्। (गृहशब्दे पञ्चमी) 1

**03. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत - [8]**

षट् कार्याणि श्रियं विनाशयन्ति। प्रथमं कारणम् अस्ति असत्यम्। य: नर: असत्यं वदति तस्य कोऽपि जन: विश्वासं न करोति। निष्ठुरता अस्ति द्वितीयं कारणम्। उक्तं च - 'सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।' तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जना: अस्मान् उपकुर्वन्ति। प्राय: जना: उपकारिणं विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एतादृश: स्वभाव: कृतघ्नता इति उच्यते। आलस्यम् अपर: महान् दोष:, आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु:। अहङ्कार: मनुष्याणां मतिं नाशयति। अहङ्कारी मनुष्य: सर्वदा आत्मप्रशंसाम् एव करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मबलं, बुद्धिबलं, शारीरिक बलं च नश्यन्ति। अत: बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्।

**(i)** एकपदेन उत्तरत - **[1×2=2]**

(क) कति कार्याणि श्रियं विनाशयन्ति?

(ख) क: मनुष्याणां मतिं नाशयति?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

(i) कीदृशा: जना: कृतघ्ना: भवन्ति?

**(iii)** अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। **[1]**

**(iv)** भाषिककार्यम् **[1×3=3]**

(क) 'प्रथमं कारणम्' इत्यत्र विशेषणपदं लिखत।

(ख) 'उद्यम:' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(ग) 'तस्य कोऽपिजन: विश्वासं न करोति।' अत्र 'तस्य' सर्वनामपदं कस्य स्थाने प्रयुक्तम्?

## खण्ड - ''ब''

**04.** तस्य मृतशरीरं राजमार्गं निकषा वर्तते। रेखाङ्कितपदे विभक्तिं तत्कारणञ्च लिखत। **[2]**

**05.** अधोलिखितौ संख्यावाचशिब्दौ संस्कृते लिखत- **[1×2=2]**

(अ) 794 (ब) 69

**06.** पतङ्गा: अम्बरपथम् आपेदिरे। रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। **[2]**

**07.** अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत- **[2]**

क्रोधो हि शत्रु: प्रथमो नराणां,<br>
देहस्थितो देहविनाशाय।<br>
यथास्थित: काष्ठगतो हि वह्नि:,<br>
स एव वह्निर्दहते शरीरम्।।

**08.** अधोलिखितश्लोकस्य अन्वयं मञ्जूषात: पदानि चित्वा पूरयत - **[2]**

यत् प्रोक्तं येन केनापि तस्य तत्वार्थनिर्णय:।<br>
कर्तुं शक्यो भवेद्येन स विवेक इतीरित:।।

| शक्यो, तत्वार्थ, विवेक, केनापि |
|---|

येन (i)......................यत् प्रोक्तम् तस्य (ii)........................निर्णय: येन कर्तुं (iii)..................भवेत् स: (iv)..................इति ईरित:।

**09.** स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यत् अस्मिन् प्रश्नपत्रे न स्यात् । **[2]**

**10.** ''जननीतुल्यवत्सला'' इति पाठसारं हिन्दीभाषायां लिखत। **[2]**

अथवा

''विचित्र: साक्षी'' इति पाठसारं हिन्दीभाषायां लिखत।

## खण्ड - ''स''

**11. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।**

विचित्रा दैवगति। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौर: गृहाभ्यन्तरं प्रविष्ट:। तत्र निहितामेकां मञ्जूषाम् आदाय पलायित:। चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत। चौर: एव उच्चै: क्रोशितुमारभत ''चौरोऽयं चौरोऽयम्'' इति। तस्य तारस्वरेण प्रबुद्धा: ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्र आगच्छन् वराकमतिथिमेव च चौरं मत्वा अभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुष: तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**(i)** एकपदेन उत्तरत - **[1]**

रात्रौ तस्मिन् गृहे क: प्रविष्ट:?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

चौर: उच्चै: क्रोशितुं किम् आरभत?

**(iii)** भाषिककार्यम् - **[1×2=2]**

(क) ''कश्चन चौर: गृहाभ्यान्तरं प्रविष्ट:।'' इत्यत्र विशेषणपदं किम्?

(ख) ''ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्रागच्छन्'' अत्र 'आगच्छन्' इति क्रियापदस्य कर्तृपदं लिखत।

**अथवा**

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञा:। पृथिव्या: गर्भे विद्यमानोऽग्निर्यदा खनिजमृतिकाशिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियस-ताप-मात्राया अष्टशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थ ग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति। निहन्यते च विवशा: प्राणिन:। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।

**(i)** एकपदेन उत्तरत - **[1]**

केषां विस्फोटै: भूकम्पं जायते?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

पृथिव्या: गर्भे विद्यमानोऽग्नि: किं करोति?

**(iii)** भाषिककार्यम् - **[2]**

(क) 'भीषणं स्खलनम्' अनयो: विशेषणपदं किम्?

(ख) 'जायते' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत ।

**12. अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्,
प्रपश्यामि ग्रामान्ते निर्झर - नदी - पय: पूरम्।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्,
शुचि पर्यावरणम्।।

**(i)** एकपदेन उत्तरत - **[1]**

कविः निर्झर, नदी - पयः परं कुत्र पश्यति?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

कविः कुत्र सञ्चरणम् इच्छति?

**(iii)** भाषिककार्यम् - **[2]**

(क) 'कान्तारे' पदस्य विशेषणपदं लिखत।

(ख) ''माम् नगरात् बहुदूरं नय।'' इत्यत्र क्रियापदं किम्?

**अथवा**

आश्वास्य पर्वतकुलं तपनोष्णतप्तम्

उद्दामदावविधुराणि च काननानि।

नानानदीनदशतानि च पूरयित्वा

रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।।

**(i)** एकपदेन उत्तरत - **[1]**

(क) कः नदी नदशतानि पूरयति ?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

(क) जलदः कीदृशानि काननानि आश्वास्य रिक्तो भवति?

**(iii)** भाषिककार्यम् - **[2]**

(क) 'नानानदी-नदशतानि च पूरययित्वा' अत्र 'नदी' इति पदस्य विशेषणपदं लिखत।

(ख) रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्री' इत्यत्र क्रियापदं किं प्रयुक्तम्?

**13. अधोलिखितं नाट्यांशं पठित्वा एतदाधारिततप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -**

रामः - अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

विदूषकः- (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्)किं नामधेया युवयोर्जननी ?

लवः- तस्याः द्वे नाम्नी।

विदूषकः- कथमिव?

लवः- तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः- अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः- (उपसृत्य) आज्ञापयतु भवान्।

**(i)** एकपदेन उत्तरत - **[1]**

लवः स्वमातुः कति नामानि कथयति?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

रामानुसारं प्रवासः कीदृशः भवति?

**(iii)** भाषिककार्यम् - **[2]**

(क) 'प्रवासोऽयं दारुण:' अनयो: पदयो: विशेष्यपदं किम्?

(ख) 'आज्ञापयतु भवान्' इति वाक्ये क्रियापदं किं प्रयुक्तम्?

**अथवा**

सिंह:- तूष्णीं भव भो:! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवा: भक्षकं रक्षकपद योग्यं न मन्यन्ते अत एव विचारविमर्श: प्रचलित:।

बक:- सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुत: एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाश: एव नास्ति।

सर्वे पक्षिण: - आम् आम् - कश्चित् खग: एव वनराज: भविष्यति इति।

**(i)** एकपदेन उत्तरत - **[1]**

व्याघ्रचित्रकौ क इव भक्षकौ?

**(ii)** पूर्णवाक्येन उत्तरत - **[2]**

सर्वे पक्षिण: कं राजासने स्थापयितुम् इच्छन्ति?

**(iii)** भाषिककार्यम् - **[2]**

(क) 'अवकाश: एव नास्ति' अत्र कर्तृपदं किं प्रयुक्तम्?

(ख) 'वन्यजीवा:' इत्यनयो: किं विशेषणपदं प्रयुक्तम्?

**14.** यथानिर्देशम् उत्तरं लिखत- **[1+1+1 =3]**

(क) नीलं च तत् उत्पलम् (समस्तपदं लिखत)

(ख) अनुरूपम् (समासविग्रहपदं लिखत)

(ग) पितरौ (समासस्य नाम लिखत)

**15.** मञ्जूषाया: प्रदत्तै: समुचितै: अव्ययपदै: वाक्यानि पूरयत। **[1+1+1 =3]**

| एव, सहसा, विना |
|---|

(i) ............................विदधीत न क्रियाम्।

(ii) क्रियां .............................नर: अकर्मण्य: भवति।

(iii) कर्मणा .........................नर: पूज्यते।

## खण्ड - ''द''

**16.** स्वं रमेशचन्द्रं मत्वा राजकीय - उच्च - माध्यमिक - विद्यालयस्य भरतपुरस्य प्रधानाचार्याय स्थानान्तरण प्रमाणपत्रप्राप्त्यर्थं संस्कृतं प्रार्थनापत्रमेकं लिखतु। **[4]**

**अथवा**

परीक्षायां सफलतायै स्वमित्रं प्रदीपकुमारं प्रति अधोलिखितम् अपूर्णं वर्धापन्नपत्रं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।

| सुहृद्वर्य, प्रणामं, जयपुरतः, कुशलं, वर्धापन्नं, एवमेव, परीक्षायाम्, अधिगतवान् |
|---|

(i) ............................

दिनाङ्कः 18.10.2024

अभिन्नहृदय(ii)....................।

सप्रेम नमस्ते।

अत्र (iii) ........................ तत्रास्तु। अद्यैव तव पत्रं प्राप्तम्। त्वं प्रथम - श्रेण्यां (iv) ................... उत्तीर्य योग्यता सूच्यां प्रथमं स्थानम् (v)............. इति पठित्वा हर्षमनुभवामि। तव प्रयासः सर्वथा साधुवादार्हः। मम (vi) .......................... स्वीकरोतु। आशासे अग्रेऽपि (vii).............. स्तुत्यप्रयासं करिष्यति।

स्वपितृभ्यां मम(viii) ........................... निवेदय।

तव स्निग्धं मित्रम्

हरीशः

**17.** अधः प्रदत्त चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि ''स्वच्छताभियानं विषये'' लिखत - **[4]**




मञ्जूषा : - स्वस्य विद्यालये, सहयोगेनैव, स्वच्छताभियानं, प्रेरयन्ति, स्वच्छताकार्यम्, सार्वजनिकस्थलस्य, अवकरम्, परिवेशम्

अथवा

मञ्जूषायाः- उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये वार्तालापं पूरयतु-

| कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमाः, शक्नोमि, अस्माकम्, योगदिवसे, अन्ताराष्ट्रिययोगदिवसः। |
|---|

पुत्रः- भोः पितः! (i) ................................21 दिनांके कः दिवसः भवति?

पिताः- अरे! तस्मिन् दिने तु (ii) ....................भवति।

पुत्रः- योगदिवसे के (iii) ......................... भवन्ति?

पिताः- (iv) ....................विश्वेजनाः प्राणायामं व्यायामं च कुर्वन्ति।

पुत्रः- योगेन (v) ........................स्वास्थ्यं सम्यक् भवति वा?

पिताः- आम्। ये योगं (vi) ......................ते रुग्णाः न भवन्ति।

पुत्रः- तर्हि अहम् अपि योगं कर्तुं (vii) ..........................वा?

पिताः- किमर्थं न, (viii) ..............................आवां योगं करवाव।

**18. अधोलिखितेषु वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु ।** **[4]**

**(i)** बालक शेर से डरता है।

**(ii)** देवेश मोहन के साथ बाजार गया।

**(iii)** उसे यहाँ रहना चाहिए।

**(iv)** धन के बिना सुख नहीं है।

**(v)** पिता पुत्र पर क्रोध करता है।

**(vi)** यह मेरा भाई राजेश है।

**19.** अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। **[3]**

**(i)** सः जलं पातुं स्नातुं च प्रतिदिनं सरितः तटम् अगच्छत्।

**(ii)** एकदा सौचिकस्य पुत्रः गजस्य करे सूचिकाम् अभिनत्।

**(iii)** क्रुद्धः सन् गजः सरितः तटम् अगच्छत्, तत्र स्नात्वा जलं च पीत्वा स्वकरे पङ्किलं जलम् आनयत्।

**(iv)** तदा सौचिकस्य पुत्रः आत्मग्लानिम् अनुभूय अति खिन्नः अभवत्।

**(v)** सौचिकस्य आपणे स्यूतेषु वस्त्रेषु असिंचत्।

**(vi)** एकः गजः आसीत्।

अथवा

अधः मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड् वाक्यानि "सदाचारः विषये" लिखत-

| |
|---|
| सदाचारः, सर्वेषाम्, लोके, भूषणं, कुर्वन्ति, समावेशं, जने, अतः। |